**दिनाङ्क :-02.01.2025**

**प्रात: - 06:55**

**प्रधानमन्त्री-मन्त्रिमण्डलम्**

प्रधानमन्त्री नरेन्द्रमोदी सबलं प्रतिपादितवान् यत् तस्य प्रशासनं कृषकाणां कल्याणाय प्रतिबद्धं वर्तते। केन्द्रीयमन्त्रिमण्डलेन विहितं निर्णयम् उररीकृत्य श्रीमोदी अकथयत् यत् पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य प्रथमं मन्त्रिमण्डलं कृषकाणां समृद्धिं वर्धयितुं समर्पितमस्तीति। असौ न्यगादीत् यत् देशाय गौरववहो विषयो विद्यते यत् कृषका: सामान्यजनानाम् उदरपूर्तये कठिनं परिश्रमं करोतीति।

**ईरानदेश: विदेशमन्त्री**

ईरानदेशस्य उप-विदेशमन्त्री माजिद-तख्त-रवांची-इत्यसौ अद्यारभ्य: द्विदिवसीययात्रार्थं भारतं प्रत्यागमिष्यति। यात्राकाले माजिद-तख्त-रवांची-इत्येष: अद्य श्व: च नवदिल्ल्याम् आयोक्ष्यमाणे ईरान -भारत-राजनीतिक-परामर्शस्य नवदशतमे चरणे भागं ग्रहीष्यति। ध्येयं वर्तते यत् भारत-ईरान-देशयो: मध्ये ऐतिहासिकरूपेण सम्बन्धो विद्यते यो हि सांस्कृतिकम् आर्थिकं सम्बन्धं च प्रतिबिम्बयति। एतद्धि सहभागित्वं विशिष्टतया ऊर्जा-व्यापारयो: क्षेत्रेषु पुष्पितं पल्लवितं च जातमस्ति।

**अमितशाह:-विमोचनम्**

केन्द्रीयगृहमन्त्री अमितशाह: अद्य नवदिल्ल्यां भविष्यमाणे पुस्तक-विमोचन-समारोहे मुख्यातिथित्वेन कार्यक्रमस्य अध्यक्षपदम् अलङ्करिष्यतीति। एतस्मिन् समारोहे केन्द्रीयशिक्षामन्त्री धर्मेन्द्रप्रधानोऽपि सम्माननीय: अतिथि: भविष्यति। अत्रावसरे प्रख्याता: प्रतिष्ठिताश्च लेखका: शिक्षाविद: मन्त्रालयस्य अधिकारिण: अन्ये च महानुभावा: उपस्थिता: भविष्यन्ति। ध्यातव्यमस्ति यत् **"जम्मूकश्मीरे एण्ड लद्दाख-थ्रू द एजेस"** इत्यनेन शीर्षकेण संवलितं पुस्तकं जम्मूकश्मीर-लद्दाख-प्रदेशयो: कथां प्रस्तौति। पुस्तकेऽस्मिन् सप्त खण्डानि निहिततानि सन्ति। यानि क्षेत्रस्य त्रिसहस्रवर्षाणां इतिवृत्तम् आवृण्वन्ति।

**प्रशासनम् एकं राष्ट्रम्**

प्रशासनेन **वन नेशन वन सब्सक्रिप्शन** इति एकं राष्ट्रम् एका सदस्यता इति योजनायाः शुभारम्भो विहितः। अस्याः योजनायाः उद्देश्यं शोधार्थिभ्यः **सिंगल सब्सक्रिप्शन प्लेटफार्म** इत्येतस्य एकल-सदस्यता ग्रहणस्य अन्तर्गतं शोधपत्राणि पत्रिकाः शैक्षणिक-सामग्र्य: च समेत्य व्यापकस्य डिजिटल इति आन्तर्जालिक-निहितानां ज्ञानस्य संसाधनानां निर्बाधोपलब्धता प्रदास्यते। अस्याः योजनायाः विविध-स्थलेषु सदस्यता ग्रहणस्य

आवश्यकता न भविष्यति। अथ च ज्ञानं सर्वेभ्यः सुलभं भविष्यति। विश्वविद्यालयानां भारतीय-प्रौद्योगिकी-संस्थानानां प्राशासनिक-साहाय्य-प्राप्तवताम् उच्च-शिक्षा-संस्थानानाम् च अशीति-लक्षाधिकैक-कोटि-विद्यार्थिनः अनया योजनया जगतः शीर्ष-शोधपत्रिकासु प्रकाशितानि शोध- पत्राणि द्रष्टुं सौविध्यं प्राप्स्यन्ति।

अवधेयं यत् केन्द्रीय-मन्त्रिमण्डलेन गतवर्षे नवम्बर-मासस्य पञ्चविंशे दिने वन नेशन, वन सब्सक्रिप्शन इति एकं राष्ट्रम् एका सदस्यता इति योजना स्वीकृतासीत्। अस्याः योजनायाः प्रथमे चरणे विविध-विषय-सम्बद्धानि चतुश्शतोत्तर-त्रयोदश-सहस्राणि अन्ताराष्ट्रिय-पत्राणि च सम्मिलितानि सन्ति।

**केन्द्रीयमन्त्रिमण्डलम** 

केन्द्रीयमन्त्रिमण्डलेन प्रधानमन्त्री -शस्यागोप-योजनायाः अर्थात् फसल-बीमा योजना अथ च पुनर्घटित -ऋत्वाधारितायाः शस्यागोप-योजनायाः च अनवरतं प्रवर्तनं निर्णीतम्। मन्त्रिमण्डलोपवेशनानन्तरं वार्ताहरान् सम्बोधयता सूचना-प्रसारण-मन्त्रिणा अश्विनीवैष्णवेन प्रोक्तं यत् एतदर्थम् आवण्टित-राशिः सार्ध-नवषष्टि-सहस्राधिक-पञ्चदश-कोटि-रूप्यकाणि यावत् विहितः।

**हॉकीतिप्रतिस्पर्धायां**

हॉकीतिप्रतिस्पर्धायां ह्यः राउरकेलायाः बिरसा-मुण्डा-हॉकी-क्रीडाङ्गणे हॉकीइण्डियनलीग-इत्येस्यां स्पर्धायां श्राची-राढ-बङ्गाल-टाइगर्सदलेन टीम-गोनासिका-इत्येतद्दलं द्वे एकम् इत्यङ्कान्तरालेन पराजितम्।

**।।इति वार्ताः।।**